"यच्चदश्वाहानि माऽशीः काममपः पिबापोमयः प्राणो न पिबतस्ते विच्छेत्स्यते" ।) जलम् । इत्यमरः । १ । १० । ४ ॥ (यथा, ऋग्वेदे ५ । ८५ । ३ ॥
"नीचीनवारं वरुणः कबन्धं प्रससर्ज रोदसी अन्तरीक्षम्" ॥)

कबन्धः पुं, (कं सुखं बध्यते रुध्यतेऽस्मात् । क + बन्ध + घञ् ।) राहुः । रक्षोविशेषः । (यथा, रघुः १२ । ५७ ।
"वधनिर्द्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ" ॥
अस्य विवरणादिकमुच्यते । पुरा किल दनुनामा कश्चिद्दानवः उग्रेण तपसा पितामहं सन्तोषयन् दीर्घमायुः प्राप्तवान् । प्राप्तदीर्घायुरतिगर्व्वः सुरराजेन सह योद्धुं सुरपुरमगच्छत् । शक्रस्तु रणभूमिगतः प्रमुक्तेन वज्रेणास्य सक्थिनी शिरश्च शरीरमध्ये प्रावेशयत् । न त्वसौ पितामहवरप्रभावतया प्राणान् मुमोच । अथ स एवं विक्षतविग्रहोऽनाहारादितया क्लिश्यमानो बहुधा याचमानः सुरपतिं प्रसादयामास । इन्द्रस्तु प्रसन्नो योजनमायतौ बाहू तीक्ष्णदंष्ट्रञ्च वदनमस्मै वक्षसि प्रादात् । तदा प्रभृत्येवासौ वने विचरन् सुदीर्घबाहुभ्यां वनजादीन् प्राणिनो गृहीत्वा भक्षयन् विचचार । अथ गच्छति काले दशरथात्मजो रामः ससीतालक्ष्मणः पितृसत्यपालनार्थं वने भ्रमन्ननुना कबन्धेन समाप्तः । प्रभूतबलशालिनानेन गृहीतोऽपि रामः खड्गेनैनं व्यापादयामास । अथ रामहस्तनाशात् प्राप्तशापमोचनसमयोऽयं कबन्धः विकृतरूपं विहाय दिव्यमूर्त्तिधरः स्वर्लोकं ययौ । इति वाल्मीकिरामायणमतम् । महाभारतमते तु अयं विश्वावसुनामा गन्धर्व्व आसीत् ब्राह्मणशापेन राक्षसयोनिं प्राप्तवान् । यदुक्तं तत्रैव ३ । २७८ । ४२ ।
"तस्याथवचे गन्धर्व्वो विश्वावसुरहं नृप ! ।
प्राप्तो ब्राह्मणशापेन योनिं राक्षससेविताम्" ॥)
उदरम् । इति मेदिनी । (केन वायुना बध्यते संबध्यते वा । धूमकेतुः । प्रवहवायुनोपचीयमानत्वात् तथात्वं तस्य च लोकसुखनाशकत्वं प्रसिद्धम् ॥)

कबन्धः, पुं, क्ली, (केन प्राणवायुना पुनर्बध्यते सम्बध्यते मस्तकहीनस्यापि दैवेन प्राणावेशात् जीवतो नरस्येव क्रियाकारित्वप्रशक्तिवात्तथात्वम् । क + बन्ध + घञ् ।) क्रियायुक्तापमूर्द्धकलेवरम् । इत्यमरः २ । ८ । ११८ । यथा, मार्कण्डेये ८२ । ६३ ।
"कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः" ॥
अपि च । "नागानामयुतं तुरङ्गनियुतं साद्धं रथानां शतं पत्तीनां दशकोटयो निपतिता एकः कबन्धो रणे । तादृक्कोटिकबन्धनर्त्तनविधौ खेलचलत् खे शिरस्तेषां कोटिनिपातने रघुपतेः कोदण्डघण्टारवः" ॥ इति प्राचीनाः ॥

कबित्थः, पुं, (कपयस्तिष्ठन्त्यत्र । "सुपिस्थः" इति कः । पृषोदरादित्वात् साधुः ।) कपित्थवृक्षः । इत्यमरटीका ॥ कवित्थः । इत्यमरमालायां पाठः ॥

कबिलः, पुं, (कद्रुवर्णे + इलच् ।) कपिलवर्णः । इति भरतो द्विरूपकोषश्च ॥

कम, उ क ङ स्पृहि । इति कविकल्पद्रुमः ॥ (चुरां -आत्मं-सकं-सेट् ।) उ कमित्वा कान्त्वा । क ङ कामयते । अन्यैर्भ्वादौ पठ्यमानस्याप्यस्य णित्करणं कम ऋत इत्यादिना विहितस्य णिङो ज्ञापनार्थं तेन अरे णिङोऽप्राप्तिपक्षे चचकमत । चकमे कमिता इत्यादि सिद्धम् । इति दुर्गादासः ॥

कम, उ ङ कान्तौ । इति मुग्धबोधव्याकरणम् । (भ्वां-आत्मं-अकं-सेट् ॥)

कम्, अ (कमुकान्तौ णिङभावे विच् ।) जलम् । शिरः । सुखम् । मङ्गलम् । पादपूरणम् । इति शब्दरत्नावली ॥ (यथा ऋग्वेदे । १ । १२३ । ११ ॥
"सुसंकाशा मातृमृष्टेव योषा विस्तन्वं कृणुषे दृशे कम्" । "अत्र कमिति पादपूरणे अथवा कमिति सुखवचनं सुखं यथा भवतीति" भाष्यम् ॥)

कमठं, क्ली, (कम + 'कमेरठः' । उणां १ । १०२ । इति + अठ ।) भाण्डभेदः । तत्तु मुनीनां जलपात्रम् । इति मेदिनी ॥

कमठः, पुं, (के जले मठति वसतीति । क + मठ वासे + पचाद्यच् ।) कच्छपः । इत्यमरः । १ । १० । २१ ॥ (यथा महानाटके ।
"कमठपृष्ठकठोरमिदं धनु-
र्मधुरमूर्त्तिरसौ रघुनन्दनः" ॥
मकठात्मामठं मांसं रामठेन समन्वितम् ।
यदि सर्पिःसमायुक्तं का सुधा वसुधातले" ॥
इत्युद्भटः ॥ * ॥ शुण्डादयोऽस्य कच्छपशब्दे ज्ञातव्याः ॥ भगवद्विष्णोर्द्वितीयावतारः । यथा हठयोगदीपिकायाम् । १ । १० ।
"अशेषतापतप्तानां समाश्रयमठो हठः ।
अशेषयोगयुक्तानामाधारकमठो हठः" ॥)
वंशः । इति शब्दरत्नावली ॥ दैत्यविशेषः । मुनिभाजनम् । इति हेमचन्द्रः ॥ शल्लकी इति धरणी ॥ (नृपविशेषः । यथा महाभारते । २ । ४ । २२ ।
"कम्पसेनः क्षितिपतिः क्षेमकश्चापराजितः ।
काम्बोजराजः कमठः कम्पनश्च महाबलः" ॥)

कमठी, स्त्री, (कमठ + पुंयोगादिति जातेरिति वा ङीष् प्रत्ययः ।) कच्छपी । इत्यमरः । १ । १० । २४ ॥ (यथा शान्तिशतके ४ । १३ ।
"इदानीमस्माकं जठरकमठीपृष्ठकठिना-
मनोवृत्तिस्तत् किं व्यसनविमुखैव क्षपयसि" ॥)

कमण्डलुः, पुं, क्ली, (कस्य प्रजापतेः जलस्य वा मण्डः सारः तं लाति आदत्ते । ला + मितद्वादित्वात् डुः ।) सन्न्यासिनां मृत्काष्ठादिमयपात्रम् । तत्पर्य्यायः । कुण्डी २ । इत्यमरः ७ । २ । ४६ । करकः ३ । (यथा मनुः २ । ६४ ।
"मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवित्" ॥)
प्लक्षवृक्षः । इति मेदिनी ॥

कमण्डलुतरुः, पुं, (कमण्डल्वाकारस्तरुः ।) प्लक्षवृक्षः । इति रत्नमाला ॥

कमनं, त्रि, (कम + णिङभावे युच् । अनुदात्तश्चेति कमेर्युच् वा ।) कामुकम् । अभिरूपम् । इति मेदिनी ॥ (यथा भागवते १ । ९ । ३३ ।
"त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने" ॥)

कमनः, पुं, (काम्यतेऽनेन । कमेः + करणे + युच् ।) कामः । अशोकवृक्षः । इति मेदिनी । ब्रह्मा ॥ इति हेमचन्द्रः ॥

कमनच्छदः, पुं, (कमनः कमनीयः छदः पक्षो यस्य ।) कङ्कपक्षी । इति हेमचन्द्रः ॥

कमनीयं, त्रि, (काम्यते यत् कमेः कर्म्मणि अनीयर् ।) कामनायोग्यम् । तत्पर्य्यायः । चारु २ हारि ३ रुचिरम् ४ मनोहरम् ५ वल्गु ६ कान्तम् ७ अभिरामम् ८ बन्धुरम् ९ वामम् १० रुच्यम् ११ सुषमम् १२ शोभनम् १३ मञ्जु १४ मञ्जुलम् १५ मनोरमम् १६ साधु १७ रम्यम् १८ मनोज्ञम् १९ पेशलम् २० हृद्यम् २१ सुन्दरम् २२ काम्यम् २३ कम्रम् २४ सौम्यम् २५ मधुरम् २६ प्रियम् २७ । इति हेमचन्द्रः ॥ (यथा, कुमारे १ । ३७ ।
"आरोपितं यद्गिरिशेन पश्चात्
अनन्यनारीकमनीयमङ्कम्" ॥)

कमन्धं, क्ली, (कम् शिरः अन्धं शून्यं यस्य ।) कबन्धम् । (कमं कान्तिं जीवनं वा दधाति विदधातीति । कम + धा + ड । पृषोदरादित्वात् साधुः ।) जलम् । इत्यमरटीकायां रायमुकुटः ॥

कमरः, त्रि, (कामयते इति । कम् + "अर्त्ति-कमि-भमीति" उणां ३ । १३२ । अरन्श्चित् ।) कामी । इत्युणादिकोषः ॥

कमलं, क्ली, (कमेः णिङ् भावे वृषादित्वात् कलच् । कम् जलं अलति अलंकरोति वा । अल + अच् । अन्तर्णिजन्तो वा ।) जलजपुष्पविशेषः । तत्पर्य्यायः । पद्मम् २ पाथोजम् ३ नलम् ४ नलिनम् ५ अम्भोजम् ६ अम्बुजन्म ७ अम्बुजम् ८ श्रीः ९ अम्बुरुहम् १० अम्बुपद्मम् ११ सुजलम् १२ अम्भोरुहम् १३ सारसम् १४ पङ्कजम् १५ सरसीरुहम् १६ कुटपम् १७ पाथोरुहम् १८ पुष्करम् १९ वार्य्यम् २० तामरसम् २१ कुशेशयम् २२ कञ्जम् २३ कजम् २४ अरविन्दम् २५ शतपत्रम् २६ बिसकुसुमम् २७ सहस्रपत्रम् २८ महोत्पलम् २९ वारिरुहम् ३० सरसिजम् ३१ सलिलजम् ३२ पङ्केरुहम् ३३ राजीवम् ३४ । (यथा रघुः । ३ । ३६ ।
"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्" ॥)
अस्य गुणाः शीतलत्वम् । स्वादुत्वम् । रक्तपित्तश्रमार्त्तिनाशित्वम् । सुगन्धित्वम् । भ्रान्तिसन्तापशान्तिपरमतर्पिकारित्वञ्च । इति राजनिर्घण्टः ॥ (तथाच भावप्रकाशः ।
"कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥
विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम् ।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥
धवलं कमलं शीतं मधुरं कफपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम्" ॥)